१५

अथसिद्धारिचक्रप्रारंभः श्रीप्रसंनोस्तु ।। पृ० ९

1

॥सिद्धा०॥ ॥श्रीगणेशायनमः॥ अथमाणमानोः सिद्धसाध्यादिशोधनंविचारः॥ ॥रिचक्र०

दीक्षाविनोपदेशस्यकुष्टत्वा प्रथमंतुसा॥ पापक्षयंदिव्यभावंसाधक

स्यकरोत्यतः तत्रापिसिद्धसाध्यादिभेदेसंशोधयेन्मनुं॥ इतिकुलमू

१ अ क थ ह	२ उ ङ प	३ आ ट ख	४ ऊ च फ
५ ओ ड व	६ ऋ झ म	७ औ ट श	८ ॡ ञ य
९ ई घ न	१० ॠ ज भ	११ इ ध क्ष ग	१२ ॠ छ ब
१३ अः त स	१४ ऐ ठ ल	१५ अं ण ष	१६ ए ट र

लावतारे॥ श्रीगणेशायनमः॥ चतुरस्रां

भुवंभित्वाकोष्टानांषोडशांलिखेत्॥ अका

रादिक्षकारांतंमातृकामपिविन्यसेत्॥१

शादिक्षिप्यक्रमेणैवसिद्धादीन्प्रेक्षयेद्बु

धः॥२॥ लेखनप्रकारमहालक्ष्मीकुलार्ण ॥३॥

वे॥ एकाग्निरुद्रनवनेत्रयुगार्कपक्तिषण्णा

राम

गषोडश्च चतुर्दशा पंचकेषु॥ कोष्ठे लिखेन्मुनि तिथीच तथाव शिष्टेवर्णान्
हुताग्निनमितान् क्रमशोंऽबिकायाः॥१॥इति हुताग्निनभमितान् त्रीन् त्रीन्
वर्णान् अंबिकायाः मातृकाः॥ अथैषां लोकानां मवलोकनं प्रकारः॥ जन्म
र्क्षास्सरतो वीक्ष्य तन्त्रमंत्रादिमाक्षरं॥ चतुर्भिः कोष्टकैस्स्वकइति कोष्ठचतु
ष्टये॥२॥ पुनः कोष्टेककोष्टेषु सव्यतो जन्मभाक्षरात्॥ सिद्धसाध्यः सुसि
द्धारिः क्रमात्तु ज्ञेयो विचक्षणैः॥२॥ साध्यानामाद्यक्षरनः सिद्धादिक्रम
इष्यते॥ स्वनामाद्यक्षरः कोष्टः सिद्धकोष्टः स उच्यते॥३॥ द्वितीये च भवेत्साध्यः
सुसिद्धस्तु तृतीयके॥ चतुर्थस्तु तन्त्रारिरेवं सर्वत्र योजयेत्॥४॥ प्रादक्षि
ण्यक्रमेणैव स्वनामाद्यक्षरक्रमात्॥ सिद्धः सिध्यति कालेन साध्यस्तु जप

2

॥ सिद्धा॰ ॥ होमतः ॥ ५ ॥ सुसिद्धो ग्रहमात्रेण रिपुर्मूलनिकृन्तनः ॥ सिद्धार्णो बांधवाङ्गे ॥ सिचक्र॰ ॥
त्थाः साध्यास्ते सेवका स्मृताः ॥ ६ ॥ सुसिद्धाः पोषकाज्ञेयाः शत्रवो घातकामताः
॥ ७ ॥ जपेन बंधुः सिद्धस्याः सेवको धिकसेवया ॥ पुष्णाति पोषको भीष्टं घात
को नाशयेध्रुवं ॥ ८ ॥ तन्त्रराजे ॥ सिद्ध सिद्धो जपा सिद्धो द्विगुणा सिद्धसाध्यकः
॥ सिद्धसुसिद्धो संप्राप्तो सिद्धारिर्हन्ति गोत्रजान् ॥ १ ॥ साध्यसिद्धो तिसंक्लेशा
त्साध्यसाध्यो तिदुःखकृत् ॥ साध्यः सुसिद्धो भजनात्साध्यारिः स्वास्त्रियं हरेत् ॥ २ ॥ सुसि॰ध सिद्धोर्धजपात्फलं दद्याद्यथेप्सितं ॥ सुसिद्धसाध्यो जापा राम
द्धोः सिद्ध्यः स्फरतोन्यथा ॥ ३ ॥ सुसिद्धस्तु सुसिद्धस्तु पूर्वजन्मकृतश्रमः ॥ ॥ २ ॥
तस्मात्सर्वसिद्धिनां साधने योजयेन्मनुं ॥ ४ ॥ सुसिद्धारिस्त्रोषेण स्वकुलं

नाशयेद्ध्रुवं॥ अरिसिद्धःसतंहन्यादरिसाध्यस्तुकन्यकां॥ ५॥ ससिद्ध
स्सपत्नीस्वांभर्त्रयरिःसाधकापहः॥ ६॥ अत्रप्रसिद्धमेवनामग्राह्यं॥
सिद्धसाध्यादियोगेषुमंत्रदानेविशेषतः॥ प्रसिद्धंनामगृण्हीयात्प्रसु
प्तोयेनजागृयात्॥ ७॥ इतिकालोत्तरवचनात्॥ अवलोकनप्रकार
स्तुतत्रराज्ञे॥ स्वनामाद्यक्षरंयत्रकोष्ठेसंदृश्यतेततः॥ सिद्धादीन्गण ग
येत्तावद्यावन्मंत्रादिदर्शनं॥ १॥ येषांमनूनांसिध्यादिशोधनंनास्तित
न्ब्रुवे॥ एकवर्णस्त्रिवर्णोवापंचवर्णोरसवर्णकः॥ २॥ सप्तार्णोनववर्णश्च
3 रुद्रार्णोरत्नाक्षरः॥ अष्टार्णोहंसमंत्रश्चवाराहोमात्रकापरः॥ ३॥ त्रि
पुराकाममंत्रश्चाज्ञासिद्धःपक्षिनायकः॥ बौद्धमंत्राजैनमंत्रानैषुसि

॥सिद्धा०॥ हा
द्यादिशोधनं॥४॥अन्यच्च॥नृसिंहार्कवराणां प्रासादप्रणवस्य च सपिं
डाक्षरमंत्राणां सिद्धादीन्नैव शोधयेत्॥१॥स्वप्नलब्धे स्त्रियादत्ते मालामंत्रे च त्र्यक्षरे॥वैदिकेषु च सर्वेषु सिद्धादीन्नैव शुद्धयेत्॥२॥एतद्भिन्नेषु
मंत्रेषु शुद्धिरावश्यकी मता॥विद्यामंत्रस्तवं सात्त्वं म रिभूत्तं त्यजेद्ध्रुवं
॥३॥अनेकसंशुद्धने च शुद्धोन प्राप्यते मनुः॥मायां कामं श्रियं चादौ द
त्वा होषं त्वालये॥४॥यद्वा दुष्टमनुजप्तः सिद्धे प्रणवसंपुटः॥यद्वाक्र
मोत्क्रमगया ऋजा प्तो वर्णमातृकया॥५॥यत्नं यस्य भवेद्भक्तिविशेषः समनुत्तमः॥वैरिकोष्टमनुप्राप्तो भीष्टदस्तस्य जायते॥६॥इति सिद्धारिचक्रं
॥अथ ऋणधनशुद्धिः॥ चक्रोद्धारः कुलमूलावृत्तारो॥इंद्रस्यैनैत्रे ॥३॥

स्य ... राम

रविपंचदन्तातुवेदवन्ह्योयुधाष्टनवेभिर्गुणितांश्च साध्यान्॥ दिग्भूगि
रिश्रुतिगजाग्निमुनीषुवेदषट्वन्हिभिश्चगणितां [illegible] नतसा
धकार्णान्॥ १॥ नामाङ्कलादकठबाङ्कजभक्तशेषं ज्ञात्वोभयोरधिक
शेषयुतंऋणस्यात्॥ अस्यार्थः॥ इंद्राद्यंकैः साध्यवर्णान्स्वरव्यंजनस्व
पेणपृथक्पृथक्कृतान्गणीन्कृत्वा॥ तथासाधकनामाक्षराणि
दिग्भूगिरिभिरंकैर्गणयेत्॥ नामाङ्कलादितिस्वरव्यंजनसमुदायात्॥
अकठबादितिवर्गचतुष्टयत्रभिन्नात॥ अइउऋऌएऐओऔअंअः ए
लक्ष्णपोवर्गः॥ कादिहांतः कवर्गः॥ टादिःफांतः टवर्गः॥ बादिहांतः बं
वर्गः॥ एतेएकादशौकारशाक्षराश्चत्वारोवर्गाः॥ अस्मात्कठबात्..

॥सिद्धां०॥ अष्टभिर्भागे हृते सति उभयोः साध्यसाधकवर्गयोः शेषस्य अधिकरूप ॥चं॰कं॰॥
स्य ऋणं न्यूनस्य धनस्य ज्ञात्वा मंत्रं हृद्यात् ॥ अथवा ॥ स्ववर्गं द्विगुणीकृत्य

१	२	३	४	५	६	७	८	९	१०	११	
१९	१७	२	१२	१५	६	४	३	८	८	१	व॰
अ	इ	उ	ऋ	लृ	ए	ऐ	ओ	औ	अं	अः	व॰
क	ख	ग	घ	ङ	च	छ	ज	झ	ञ	ट	व॰
ठ	ड	ढ	ण	त	थ	द	ध	न	प	फ	व॰
ब	भ	म	य	र	ल	व	श	ष	स	ह	व॰
१०	१	७	४	८	२	७	५	४	६	३	व

परवर्गेण संयुतं ॥ अष्टभिस्तु हरेद्भागं शे
षं च धनमुच्यते ॥१॥ अथवा ॥ मंत्रवर्णान्
पृथक्कुर्यात् स्वरव्यंजनसंयुतः ॥ कोष्टे
यावति वर्णः स्यात् गणयेत्तावदंककं ॥१॥ कोष्टोपरिस्थेनांकेन सर्ववर्णे राम
ष्वयं विधिः ॥ दीर्घाक्षराणामंकास्तु ज्ञेया लघ्वक्षरस्थिताः ॥२॥ एकीकृ
त्वा लिखानंकानष्टभिर्विभजेत्पुनः ॥ शेषांको मंत्रराशिः स्यान्नामवर्णेष्व
यं विधिः ॥३॥ अधः पंक्तिस्थितैरंकैर्गणना यास्तु नेखिलाः ॥ अधमर्णो ॥४॥

धिकोराशिरृणोराशिर्धनीस्मृतः॥४॥ मंत्रोयदाधमर्णःस्यात्तदासाध्यो
धनीनतु॥ एवंधनवर्णसंप्रोक्तमन्यथाप्रोच्यतेपुनः॥५॥ नामाद्यक्षरमा
रभ्ययावन्मंत्रादिमाक्षरं॥ गणयेन्मातृकावर्णक्रमेणगुणयेत्त्रिभिः॥६॥
विभजेत्सप्तभिःशिष्टोनामराशिरुदीरितः॥ एवंमंत्राणामारभ्ययावन्ना
मादिमाक्षरं॥७॥ गणयित्वात्रिभिर्हत्वाविभजेत्सप्तभिःसुधीः॥ मंत्रराशिः
स्मृतःशिष्टःपूर्ववद्गुणतर्पितः॥८॥ यद्वामंत्राक्षराणीहस्वरव्यंजनरूपतः
॥ पृथक्कृत्यद्विगुणयेद्योजयेत्साधकाक्षरैः॥९॥ ताडयेदष्टभिर्भक्तेमंत्र
5 राशिरुदाहृतः॥ एवंनामा[illegible]र्णसंघोपिद्विगुणीकृत्ययोजितः॥१०॥ मं
त्रवर्णैरष्टभक्तोनामराशिःस्मृतोबुधैः॥ ऋणिताधनिताचात्रपूर्ववत्परिक

सिद्धा०॥ स्थित॥११॥उक्ता न्यतम मार्गेण शोधनीयमृणं धनं॥यो मन्त्रः पूर्वजनुषि सेवि ॥चक्र०॥
तो नाददात्फलं॥१२॥पापात्पापक्षये जाते फलदाता भवन्निरनर्हसि॥आयुःक्षया
द्धतो नात्रा साधकस्य भवांतरे॥१३॥ऋणि त्वात्पाति मात्रेण मंत्रोभिष्टं प्रयच्छ
ति॥समांकोयदा भेरात्री तदासंसेवना फलं॥१४॥धनी मंत्रस्तु संप्राप्तः
फलं त्वधिकसेवया॥१५॥इति धनर्णशोधनविधिः॥कूलमुलावतारे
॥स्वन्योपदिष्टमंत्रस्य नविधिर्नैवचक्रिया॥उद्दिष्टदेवतां ध्यात्वा जपे
च्छुभकरं भवेत्॥१॥इत्ययं सिद्धारिभेदः॥ऊर्ध्वगाः पंचरेखास्युः पंच राम
तिर्यग्गताः शुभाः॥कोष्टानि तत्र जायंते षोडशैवात्र संलिखेत्॥१॥को
ष्टेषु मातृकावर्णान्तत्र नामादितः क्रमात्॥सिद्धः साध्यः सुसिद्धो ॥५॥

रिः ईर्ययोमन्वक्षराचवधिः॥ ३॥ यस्मिंश्चतुष्के नामार्णं तस्मात्सिद्धचतुष्ट
यं॥ प्रादक्षिण्याद्द्वितीयकं साध्याख्यं ततस्तृतीयकं॥ ३॥ सुसिद्धाख्यं चतु
र्थं तु सयत्नाख्यं स्मृतो बुधैः॥ एककोष्ठे द्वयोर्वर्णौ सिद्धसिद्धः प्रकीर्ति
तः॥ ४॥ तद्द्वितीये मन्त्रवर्णे सिद्धः साध्यः स्मृतस्ततः॥ तृतीये सिद्धसुसिद्धः
सिद्धारिस्याच्चतुर्थके॥ ५॥ नामार्णयुक्चतुष्कोष्ठे मन्त्रवर्णश्च द्वितीय
के॥ चतुर्थे तत्र पूर्वं तु यत्र नामाक्षरं स्थितं॥ ६॥ तदेव कोष्ठमारभ्य गण्ये
त्पूर्ववत्क्रमात्॥ सिद्धसिद्धः सिद्धसाध्यः सिद्धःसुसिद्धः सिद्धारिः॥ ७॥
साध्यः सिद्धः साध्यसाध्यः तत्सुसिंश्चलद्रिपुः॥ एवं भेदतृतीये च च
तुष्के मंत्रवर्णकः॥ तद्वापूर्वोक्तरीत्यादिक्रमाज्ज्ञेयो विचक्षणैः॥ ८॥ फलं तु

सिद्धा० ॥ पूर्ववज्ज्ञेयं॥ इति सिद्धारिशुद्धिः॥ अथ मन्त्राणां स्वकुलान्यकुलं वक्ष्यामः॥ उ ॥ चक्रं० ॥
ऊगडजदाबालाअः पार्थिवाः॥ १॥ ऋ ॠ ओ घझढधमवाशाः वारुणाः॥ २
इई खछठथफरक्षा आग्नेया तैजसाः॥ ३॥ अआएकचटतपयशाः मारु
ताः॥ ४॥ ऌ ॡ अंङ ञणनमषाः ह नाभसाः आकाशाः॥ ५॥ साधकस्याक्षरं
पूर्वं मंत्रस्यापि तदक्षरं॥ यद्येकभवेद्द्वैव स्वं जानीयात्स्वकुलं हि तत्॥ १॥ रुद्र
यामले॥ महासलिलयोर्मैत्री अनलानिलयोरपि॥ सामान्यमग्निभूम्यास्तु राम
सलिलानलयोरपि॥ १॥ शात्रवं वैपरित्येन मंत्रं सर्वत्र चापरं॥ परस्परविरु
द्धानां वर्णानां यत्र संगतिः॥ ७॥ वर्जयेत्तादृशं मंत्रं नाशाक्रतकुलेषु हि॥ २
फलं॥ भौमस्य वारुणं मैत्रं आग्नेयस्यापि मारुतं॥ मारुतं पार्थिवाप्या ॥ ८॥

लाशास्वाग्नेयस्यचाभसं॥१॥ नाभसंसर्वमित्रस्याद्विरुधंनैवमेलये
त्॥२॥इतिस्वकुलान्यकुलभेदः॥ राशिमेलनमाख्यास्येनक्षत्रंस्थि
तिमध्यलः॥अआइईमेषः॥उऊऋॠवृषः॥लृॡमिथुनः॥एऐकर्कः
ओऔसिंहः॥अंअःशषसहळंक्षाःकन्या॥कवर्गस्तुलः॥चवर्गोवृश्चि
काः॥टुःधनुः॥तुःमकरः॥पुःकुंभः॥यरलवमीनः॥साध्यानिरस्यराशं
लंगणयेत्साधकाक्षरात्॥फलं॥एकपंचनवबांधवास्मृताद्वोषडेतिद
शमारुसेवका॥वन्हिरुद्रमुनयस्तुपोषकाद्वादशाष्टचतुरस्तुघात
काः॥१॥इतिवैष्णवविषये॥अन्त्यांतुषष्टवर्जनीयं॥द्वादशाष्टमष
ष्ठानिवर्ज्यानीतिवचनात्॥ इतिराशिमेलनं॥अआअश्विनीदेवगणः

सिद्धा०॥ इईभरणीमनुष्यगणः॥इउउंकृत्तिकाराक्षसगणः॥ ऋॠलृरोहि० मनु० ॥चऋ०॥
॥एमृगदेवग०॥ऐआर्द्रामनु०॥ओऔपुन०दे०॥कपुष्यदे०॥खगआश्ले०
रा०॥घङमघा०रा०॥चपूर्वामनु०॥छउत्तरामनु०॥झहस्तदे०॥टठ
चित्राराक्ष०॥डस्वातीदे०॥ढणविशा०रा०॥तथदअनु०दे०॥धज्येष्ठा
रा०॥नपफमु०रा०॥बपूर्वाषा०मनु०॥भउत्तराषा०मनु०॥मश्रवणदे०
॥यरधनिष्ठारा०॥लशतता०रा०॥वशपूर्वाभा०म०॥सहक्षउत्तरा राम
भा०मनु०॥अंअःरेवतीदेवगणः॥प्रादक्षिण्येनगणयेत्साधकाद्या
क्षरात्सुधीः॥जन्मसंपद्विपत्क्षेमप्रत्यरिःसाधकोवधः॥१॥मित्रंच ॥७॥
परमित्रंचजन्मादीनिपुनःपुनः॥विपद्वधप्रत्यरिश्चपरित्याज्यामनी

षिभिः॥ २॥ स्वगणे चोत्तमाप्रीतिर्मध्यमा देवमानुषे॥ अधमा राक्षसे देवे मृत्युर्मानवराक्षसोः॥ ३॥ इति नक्षत्रचक्रं॥ अथ राशिचक्रं॥ अआ इई मेषः॥ उऊ ऋॠ वृषः॥ ऌॡ मिथुनः॥ एऐ कर्कः॥ ओऔ सिंहः॥ अं अः शषसहक्ष साः कन्या॥ कुस्तुलः चुर्वृश्चिकः॥ टुर्धनुः॥ तुर्मकरः॥ पुः कुंभः॥ यरलवाः मीनः॥ राशीनां शुद्धता ज्ञेया यजेत्तत्रानुमतिं व्ययं॥ स्वराशेर्मंत्र राश्यंतं गणनीया विचक्षणैः॥ १॥ फलं॥ लग्नं॥ १॥ धनं॥ २॥ भ्राता॥ ३॥ बांधव॥ ४॥ पुत्र॥ ५॥ शत्रु॥ ६॥ कलत्र॥ ७॥ मरण॥ ८॥ धर्म॥ ९॥ कर्म॥ १०॥ आय॥ ११॥ व्यय॥ १२॥ इति द्वादशराशिशुद्धिः॥ अथ मंत्राणां शोधने भूयः प्रकारांतरमुच्यते॥ षट्कोणे तु लिखेत्सुर्वं कोणाद्येकैकव

8

सिद्धा० ॥ र्णकान् ॥ १ ॥ अकारादिहकारांतान्नपुंसकविवर्जितान् ॥ नामाद्यक्षरमारभ्य ॥ चक्र० ॥

मंत्रार्णावधिशोधयेत् ॥ २ ॥ प्रथमेसंपदाप्राप्तिर्द्वितीयेधनसंक्षयः ॥ तृतिये

धनसंप्राप्तिश्चतुर्थेबंधुविग्रहः ॥ ३ ॥ पंचमेतुभवेद्व्याधिषष्ठेसर्वस्वसंक्षयः

एवंसंशोधितंचक्रंदद्याच्छिष्यायमांत्रिकः ॥ ४ ॥ प्रमाणं ॥ सिद्धसाध्यादि

भेदेनस्व कुलान्यकुलानवै ॥ बालप्रौढजरद्वृद्धैस्तथास्त्री

पुंनपुं सकैः ॥ राशिनक्षत्रभेदेनसुप्तबुद्धादिभि राम

स्तथा ऋणेनचधनेनाश्वभागशोषोपलक्षितः ॥ ५

अकछडध मष ॥ ७ ॥ आएखगजढनयस ॥ ८ ॥ ओगझण ॥ ८ ॥

ह पर ॥ ८ ॥ इओघ अतफल ॥ ७ ॥ उअड टथबव ॥ ७ ॥ ऊँअः चढदभक्ष ॥ ७

इतिषट्कोणविचारः ॥ इति सिद्धचक्रसमाप्तः ॥ श्रीलक्ष्मित्रसन्नं ॥ ६७

अकछड धमष ८
ऐचठ कञझअः ७
ईउडअ टथबष ७
औ इघञ लफल ७
३
१